International Journal of Sanskrit Research 2020; 6(1): 218-222

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(1): 218-222
© 2020 IJSR
www.anantaajournal.com
Received: 24-11-2019
Accepted: 28-12-2019

**के.वेङ्कट नरसिंह शास्त्री**
शोधच्छात्रः, कृष्णयजुर्वेद विभागः
श्री वेङ्कटेश्वर वेद विश्वविद्यालयः,
तिरुपतिः आंध्र प्रदेश, भारत

Corresponding Author:
**के.वेङ्कट नरसिंह शास्त्री**
शोधच्छात्रः, कृष्णयजुर्वेद विभागः
श्री वेङ्कटेश्वर वेद विश्वविद्यालयः,
तिरुपतिः आंध्र प्रदेश, भारत

# तैत्तिरीय शाखान्तर्गत स्वरितस्वर विचार

**के.वेङ्कट नरसिंह शास्त्री**

### प्रस्तावना

कृष्णयजुर्वेदतैत्तिरीयशाखायां चत्वारः स्वाराः दृश्यन्ते । ते च उदात्तानुदात्तस्वरितप्रचयाः इति। तेषु स्वरितस्य सप्तविधप्रभेदाः दृश्यन्ते, नित्यः, अभिनिहतः, क्षैप्रः, प्रश्लिष्टः, पादवृत्तः, तैरोव्यञ्जनः, प्रातिहतश्चेति । तैत्तिरीयप्रातिशाख्ये विंशतितमे अध्याये एवं व्यासशिक्षायां स्वरसन्धिप्रकरणे च सप्तविधस्वरितप्रभेदविषयमधिकृत्य सुस्पष्टतया विवरणं कृतम् । इममेव विषयमधिकृत्य किञ्चिदिव अत्र विचार्यते ।

### नित्यस्वरितनिरूरणम्

सूत्रम् - सयकारवकारन्त्वक्षरं यत्र स्वर्यते स्थितेपदेऽनुदात्तपूर्वेऽपूर्वे वा नित्य इत्येव जानीयात् ।

पदकाले समानपदे यकारेण वा वकारेण सहितः, अनुदात्तपूर्वः स्वरपूर्वाभावो वा स्वरवर्णः यत्र स्वरितं स्वर्यते सः स्वरितः नित्यसंज्ञः भवति इति ।

उदा – कन्येव [2] । इति । अत्र कन्या इति पदे यकारसहितस्य अनुदात्तपूर्वस्य आकारस्य यः स्वरितः सः नित्यस्वरितः इति प्रकृत सूत्रेण ज्ञायते ।

उदा – क्व जगती च [3] । अत्र क्व इति पदे स्वरपूर्वाभावे वकारसहितस्य अकारस्य यः स्वरितः सः नित्यस्वरितः इति प्रकृतसूत्रेण ज्ञेयः ।

अयमेव विषयः व्यासशिक्षायामेवमुक्तः -

सू – अखण्डे सयवो नित्यो नीचपूर्वः स्वयञ्च वा [4] । इति ।।

### अभिनिहतस्वरित निरूपणम्

**सू – तस्मादकारलोपेऽभिनिहतः** [5] ।

पृथक्पदस्थोदात्ताभ्यां एकारौकाराभ्यां अव्यवहितपरभूतस्य अनुदात्तस्य अकारस्य लोपे सति

एकारौकरयोः यः स्वरितः स्वर्यते सः अभिनिहतसंज्ञकः इति ।

उदा – तेऽब्रुवन्[6] । अत्र ते इत्यस्य पदस्यान्ते विद्यमानात् उदात्त-एकारात् परभूतः अब्रुवन्न् इत्यत्र पदस्यादौ विद्यमानः अनुदात्तः अकारः, लुप्यते त्वकार एकारओकारपूर्वः [7] इत्यनेन सूत्रेण लुप्यते। तथा अनुदात्तस्य अकारस्य लोपे सति तस्मिन्ननुदात्ते पूर्व उदात्तस्वरितम् [8] इत्यनेन सूत्रेण उदात्तस्य एकारस्य यः स्वरितः स्वर्यते सः अभिनिहतस्वरितः इति प्रकृतसूत्रेण ज्ञेयः ।

अयमेव विषयः व्यासशिक्षायामेवमुक्तः –

नीचोध्र्वाकारसम्मिश्र उच्च एङ् स्वरितो भवेत्[9]।
अत्राभिनिहतश्चायमिति संज्ञायते बुधैः [10] ।। इति ।

क्षैप्रस्वरितनिरूपणम्

इवर्णोकारयोर्यवकारभावे क्षैप्र उदत्तयोः [11] ।

उदत्तयोः इवर्णोकारयोः सन्धिवशात् यवकारयोः सतोः परतः अनुदात्तः स्वर्यते चेत्, सः क्षैप्र संज्ञयुक्तः इत्यर्थः ।

उदा – व्येवैनेन [12] । अत्र वि इति पदस्यान्ते विद्यमानात् उदात्तात् इकारात्, अनन्तरं एव इति पदादौ विद्यमान अनुदात्त एकारो भवति । अतः इवर्णोकारौयवकारौ [13], इत्यनेन वि इत्यत्र उदात्त इकारः यकारं प्राप्नोति । तथा सति उदात्तयोश्चपरोऽनुदात्तस्वरितम् [14] इत्यनेन सूत्रेण अनुदात्तस्य एकारस्य यः स्वरितः विहितः सः क्षैप्रस्वरितः इति प्रकृतसूत्रेण ज्ञेयः ।

अयमेव विषयः व्यासशिक्षायामेवमस्ति –

सू – यवत्वे ह्युच्चयोर्यत्र इवर्णोकारयोरपि ।
परतः स्वर्यते नीचः स्वरितः क्षैप्र उच्यते [15] । इति ।

प्रश्लिष्टस्वरितनिरूपणम्

सू – ऊभावे प्रश्लिष्टः [16] ।

पृथक्पदस्थात् उदात्तात् उकारात् परतः अनुदात्ते उकारे स्थिते सति तयोः ऊभावे पूर्वेणोदात्तेन परस्यानुदात्तस्य यः स्वरितः स्वर्यते सः प्रश्लिष्ट संज्ञकः इति ।

उदा – दिक्षूपद्धाति [17] । अत्र दिक्षु इत्यत्र पदान्ते स्थितात् उदात्तात् उकारात् अनन्तरं उपदधाति इत्यत्र पदादौ स्थित अनुदात्त उकारः भवति । तथा सति दीर्घंःसमानाक्षरे सवर्णपरे [18] इति सूत्रेण तयोः द्वयोः उवर्णयोः ऊभावः, एवम् ऊभावे प्रश्लुष्टः [19] इत्यनेन सूत्रेण ऊभावस्य यः स्वरितः आदेशः सः स्वरितः प्रश्लिष्टनामकः इति प्रकृतसूत्रेण जानीयात् ।

अयमेव विषयः व्यासशिक्षायामेवमस्ति –

सू – उच्चोत्वान्नीच उत्वे स्यात् प्रश्लिष्टस्सन्धितो यमः [20] ।
इति ।

पादवृत्तस्वरितनिरूपणम्

सू – पदविवृत्त्यां पादवृत्तः [21] ।

पदयोः मध्ये वर्त्तिन्याः विवृत्तेरनन्तरः यः स्वरितः स्वर्यते सः पादवृत्तसंज्ञकः इति ।

उदा – ता अस्मात् [22] । अत्र ताः इति पदान्ते उदात्त आकारः सविसर्गो भवति । अनन्तरं अस्मात् इत्यत्र पदादौ अनुदात्त अकारः भवति । तयोः सांहितेन अथस्वरपरोयकारम् [23] इत्यनेन सूत्रेण स्वरपरत्वात् विसर्गः यकारं प्राप्नोति । एवं च लुप्येते त्ववर्णपूर्वौ यवकारौ [24] इत्यनेन सूत्रेण अवर्णपूर्वत्वात्, स्वरपरत्त्वाच्च यकारस्य लोपः । ततः परश्च परश्च [25] इत्यनेन सूत्रेण उदात्ताकारस्य अनुदात्तस्य अकारस्य च सन्ध्यभावः । तथा सति उदात्तात् परोऽनुदात्त स्वरितम् [26] इत्यनेन सूत्रेण अनुदात्त अकारः स्वरितमापद्यते । तादृशः स्वरितः पादवृत्तनामकः इति प्रकृतसूत्रेण ज्ञायते।

अयमेव विषयः व्यासशिक्षायामेवमस्ति –

सू - पादवृत्तस्तयोर्व्यक्तावन्यः प्रातिहतस्मृतः [27] ।
उच्चादुत्तरतोनीचः स्वरितं प्रतिपद्यते [28] । इति ।।

तैरोव्यञ्जनस्वरितनिरूपणम्

सू – उदात्तपूर्वस्तैरोव्यञ्जनः [29] ।

समानपदे उदात्तपूर्वस्य व्यञ्जनसहितस्य स्वरवर्णस्य यः स्वरितः तादृशस्स्वरितः तैरोव्यञ्जन संज्ञकः इति ।

उदा – युञ्जन्ति [30] । अत्र अखण्डे पदे उदात्ताकारात् परस्य नकारतकारयोः संयोगानन्तरं स्थितस्य, इकारस्य उदात्तात्परोऽनुदात्तस्स्वरितम् [31] इत्यनेन सूत्रेण यः स्वरितः सः तैरोव्यञ्जननामकः इति प्रकृतसूत्रेण ज्ञायते।

अयमेव विषयः व्यासशिक्षायामेवमस्ति –

सू – समानपदेस्वारस्तैरोव्यञ्जन उच्यते [32] ।

उच्चादुत्तरतोनीचः स्वरितं प्रतिपद्यते [33] । इति ।।

प्रातिहतस्वरितनिरूपणम्

सू – अपिचेन्नानापदस्थमुदात्तमथचेत्सांहितेन स्वर्यते स प्रातिहतः [34]।

पृथक्पदस्थोदात्तात् परोऽनुदात्तः सांहितेन स्वर्यते चेत् स प्रातिहत संज्ञकः इति ।

उदा – माते अस्याम् [35] । मा इत्यत्र उदात्त आकारः भवति । ते इत्यत्र अनुदात्त एकारः भवति । मा ते इत्यनयोः पदयोः सांहितेन उदात्तात्परोऽनुदात्तस्स्वरितम् [36] इत्यनेन सूत्रेण ते इत्यत्र विद्यमानस्य अनुदात्तस्य एकारस्य यः स्वरितः, सः प्रातिहतनामकः इति प्रकृतसूत्रेण ज्ञायते।

अयमेव विषयः व्यासशिक्षायामेवमुक्तः –

सू - पादवृत्तस्तयोर्व्यक्तावन्यः प्रातिहतस्मृतः [37] ।

उच्चादुत्तरतोनीचः स्वरितं प्रतिपद्यते [38] । इति ।।

एवं प्रकारेण कृष्णयजुर्वेदतैत्तिरीयशाखान्तर्गत सप्तविधस्वरितप्रभेदाः निरूपिताः ।

स्वरितेषु नित्यानित्यत्वविचारः

उक्तस्वरितेषु नित्यानित्यत्वविषयमधिकृत्य किञ्चिदत्र विचार्यते । स्वरितेषु मुख्यनित्यत्वं, गौणनित्यत्वम्, अनित्यत्वञ्च दृश्यते । अत्र नित्यस्वरितस्य पदपाठे सत्वात् अपवादाभावाच्च मख्यनित्यत्वं प्रतिपादयन्ति । गौणनित्यत्वं तु क्षैप्राभिनिहतप्रश्लिष्टस्वराणाम् अभिज्ञाः उपदिशन्ति । एतेषां स्वरितानां गौणनित्यत्वं किमर्थम् इतिचेत्, एतेभ्यस्स्वरितेभ्यः परतः यदि उदात्तानुदातौ भवतश्चेदपि एतेषां स्वरितानां स्वरितत्वमेव, न तु स्वरितनिषेधो दृश्यते । अतः एतेषां पदपाठे स्वरिताभावेपि अपवादभावात् गौणनित्यत्वम् । प्रातिहततैरोव्यञ्जनपादवृत्तस्स्वरितानाम् अनित्यत्वम् । एतेषां त्रयाणां सापवादत्त्वात् अनित्यत्वम्। नोदात्तस्वरितपरः [39] इत्यनेन सूत्रेण एतेभ्यः स्वरितेभ्यः परतः यदि उदात्तस्वरितौ भवतः तर्हि एते अनुदात्ताः भवन्ति ।

उदा – उदात्तपरे – कीरिणामन्यमानः [40] । स्वरितपरे – तस्यै व्यृद्धम् [41] । इति ।

अयमेव विषयः व्यासशिक्षायाम् एवमस्ति -

स्वारोयं प्रचयश्चैव नोदात्तस्वरितपरे [42] । इति ।

**कम्पविषयविचारः**

एवम् उक्तेषु सप्तविधस्वरितेषु नित्यत्वविशिष्टान् स्वरितान् अधिकृत्य कम्पसंज्ञकः कश्चन उच्चारणविशषः लक्षणग्रन्थेषु उपदिष्टः। सप्तविधस्वरितेषु केवलं चतुर्णां स्वरितानां कम्पलक्षणमुच्यते । ते च नित्यस्वरितः, अभिनिहतस्वरितः, क्षैप्रस्वरितः, प्रश्लिष्टस्वरितश्चेति ज्ञायते । उक्तं च प्रातिशाख्यव्याख्याने-

नित्योऽभिनिहतश्चैव क्षैप्रः प्रश्लिष्ट एव च ।

एतेस्स्वाराः प्रकम्पन्ते यत्रोच्चस्वरितोदयः [43] ।। इति ।

अत्र नित्यस्वरितस्य मुख्यनित्यत्वम्, एवम् अवशिष्टत्रयाणां स्वरितानां गौणनित्यत्वम् । कम्पलक्षणं प्रातिशाख्योक्तं विचार्यते अत्र । तद्यथा

_सू – द्वियम एके द्वियमपरे ता अणुमात्राः [44] । इति

अस्मिन् सूत्रे यमशब्देन स्वरितः उच्यते । द्वौ स्वरितौ, त्रयः स्वरिताश्च यत्र स्थले नैरन्तर्येण वर्तन्ते, द्वियमस्थले तस्यामेव प्रकृतौ [45] इत्यनेन सूत्रेण पूर्वस्वरितस्यान्ते अणुमात्राकालः अनुदात्तो भवति, एवं त्रियमस्थले तस्यामेव प्रकृतौ [46] इत्यनैव सूत्रेण पूर्वयोः स्वरितयोः एव प्रकृत्योरणुमात्रतया निहतत्वं भवति, अयमेव कम्प इत्युच्यते ।

उदा - द्वियमस्थले – तेऽ2न्योन्यम् [47] । त्रियमस्थले - सोऽ2पोऽ2भ्यम्रियत [48]।

नित्यस्वरितकम्पः - बहुदेवत्योऽ2ह्येषः [49] । अभिनिहतस्वरितकम्पः- तेऽ2न्योन्यम् [50] । क्षैप्रस्वरितकम्पः – विश्वानिह्येऽ2षोऽभिधामानि [51] । प्रश्लिष्टस्वरितकम्पः – उर्वन्तरिक्षम् [52] अत्र विलोमे । व्यासशिक्षायां स्वरसन्धिप्रकरणे कम्पविषयः एवं दृश्यते –

स्थितस्वारस्य चान्त्योणुर्नीचस्स्यात्प्रणवोत्तरे [53] ।  
स्वरद्वयस्य चैकस्मिन् कम्पसंज्ञास्ति दीर्घता [54] ।  
क्षैप्रकम्पश्चतुर्धैवमादूदेदैद्भिरुच्यते [55] ।  
प्रश्लिष्टो नित्य उदात्यामेङाभिनिहतस्स्मृतः [56] । इति

तैत्तिरीयसंहितान्तर्गतस्वरितकम्पविषयः निरूपितः । एवं प्रकारेण सप्तविधस्वरितप्रभेदाः तदाश्रितानि कार्याणि च निरूपितानि । एवं लक्षणानुसारं स्वरविषयकविशेषज्ञानपूर्वकं कृतमध्ययनं पात्रतां गमयति । तथा च शिक्षा –

लक्षणेन विना वाणी निर्मलापि नशुद्ध्यति ।  
उत्तमो लक्षणज्ञानी लक्ष्यज्ञानी तु मध्यमः ।  
लक्ष्यलक्षणयोर्ज्ञानी तद्विपात्रं प्रशस्यति ।। इति

**सङ्केताक्षरसूचि** –

तै.प्रा. – तैत्तिरीयप्रातिशाख्यम्  
तै.प्रा.व्या – तैत्तिरीयप्रातिशाख्य व्याख्यानम्  
तै.सं – तैत्तिरीयसंहिता  
व्या.शि – व्यासशिक्षा  
सू—सूत्रम्  
उदा-उदाहरणः

**संदर्भ**


1. तै.प्रा. 20.3
2. तै.सं.3.1.11
3. तै.सं.7.1.4
4. व्या.शि.301
5. तै.प्रा. 20.4
6. तै.सं. 2.5.1
7. तै.प्रा. 11.1
8. तै.प्रा. 12.9
9. व्या.शि. 296
10. व्या.शि. 297
11. तै.प्रा. 20.1
12. तै.सं. 5.3.11
13. तै.प्रा. 10.15
14. तै.प्रा.10.16
15. व्या.शि. 298,299
16. तै.प्रा. 20.5
17. तै.सं.5.5.5
18. तै.प्रा.10.2
19. तै.प्रा.10.17
20. व्या.शि.300

21. तै.प्रा.20.6
22. तै.सं.2.1.2
23. तै.प्रा.9.10
24. तै.प्रा.10.19
25. तै.प्रा.10.25
26. तै.प्रा. 14.29
27. व्या.शि. 312
28. व्या.शि. 308
29. तै.प्रा. 20.7
30. तै.सं 7.4.20
31. तै.प्रा.14.29
32. व्या.शि. 311
33. व्या.शि. 308
34. तै.प्रा. 20.3
35. तै.सं. 1.6.12
36. तै.प्रा.14.29
37. व्या.शि. 312
38. व्या.शि. 308
39. तै.प्रा.14.31
40. तै.सं. 1.4.46
41. तै.सं. 6.5.6
42. व्या.शि. 309
43. तै.प्रा.व्या. 19.3
44. तै.प्रा.19.3
45. तै.प्रा.19.4
46. तै.प्रा.19.4
47. तै.सं. 6.1.5
48. तै.सं. 6.1.1
49. तै.सं.2.1.6
50. तै.सं. 6.1.5
51. तै.सं.6.1.11
52. तै.सं.1.1.4
53. व्या.शि. 302
54. व्या.शि. 303
55. व्या.शि. 304
56. व्या.शि. 305